श्रीलक्ष्मीहयग्रीवपञ्चरत्नम्

Shri Lakshmihayagriva Pancharatnam

sanskritdocuments.org

March 15, 2018

Shri Lakshmihayagriva Pancharatnam

श्रीलक्ष्मीहयग्रीवपञ्चरत्नम्

Sanskrit Document Information

Text title : lakShmIhayagrIvapancharatnam

File name : lakShmIhayagrIvapancharatnam.itx

Category : vishhnu, vishnu, lakShmI, pancharatna, devii

Location : doc_vishhnu

Transliterated by : Rujuta rujuta5879 at gmail.com

Proofread by : Rujuta rujuta5879 at gmail.com

Latest update : March 15, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

March 15, 2018

sanskritdocuments.org

श्रीलक्ष्मीहयग्रीवपञ्चरत्नम्

ज्ञानानन्दामलात्मा कलिकलुषमहातूलवातूलनामा
सीमातीतात्मभूमा मम हयवदना देवता धावितारिः ।
याता श्वेताब्जमध्यं प्रविमलकमलस्त्रग्धरादुग्धराशिः
स्मेरा सा राजराजप्रभृतिनुतिपदं सम्पदं संविधत्ताम् ॥ १॥

तारातारधिनाथस्फटिकमणिसुधाहीरहाराभिरामा
रामा रत्नाब्धिकन्याकुचलिकुचपरीरम्भसंरम्भधन्या ।
मान्याऽनन्यार्हदास्यप्रणततितिपरित्राणसत्नात्तदीक्षा
दक्षा साक्षात्कृतैषा सपदि हयमुखी देवता साऽवतान्नः ॥ २॥

अन्तर्ध्वान्तस्य कल्यं निगमहृदसुरध्वंसनैकान्तकल्यं
कल्याणानां गुणानां जलधिमभिनमद्बान्धवं सैन्धवास्यम् ।
शुभ्रांशु भ्राजमानं दधतमरिदरौ पुस्तकं हस्तकञ्जैः
भद्रां व्याख्यानमुद्रामपि हृदि शरणं याम्युदारं सदारम् ॥ ३॥

वन्दे तं देवमाद्यं नमदमरमहारत्नकोटीरकोटी-
वाटीनियत्ननिर्यद्घृणिगणमसृणीभूतपादांशुजातम्।
श्रीमद्रामानुजार्यश्रुतिशिखरगुरुब्रह्मतन्त्रस्वतन्त्रैः
पूज्यं प्राज्यं सभाज्यं कलिरिपुगुरुभिश्शश्वदश्वोत्तमाङ्गम् ॥ ४॥

विद्या हृद्याऽनवद्या यदनघकरुणासारसारप्रसारात्
धीराधाराधरायामजनि जनिमतां तापनिर्वापयित्री ।
श्रीकृष्ण ब्रह्मतन्त्रादिमपदकलिजित्संयमीन्द्रार्चितं तत्
श्रीमद्धामातिभूम प्रथयतु कुशलं श्रीहयग्रीवनाम ॥ ५॥

इति श्रीकृष्णब्रह्मतन्त्रपरकालमहादेशिककृतिषु
श्रीलक्ष्मीहयग्रीवपञ्चरत्नं नाम स्तोत्रं समाप्तम् ॥

Encoded and proofread by Rujuta rujuta5879 at gmail.com

Shri Lakshmihayagriva Pancharatnam

pdf was typeset on March 15, 2018

Please send corrections to *sanskrit@cheerful.com*